শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

॥ শ্রী ৱৈনতেযাষ্টোত্তরশতনামস্তোত্রম্ ॥

This document has been prepared by

Sunder Kidāmbi

with the blessings of

শ্রী রঙ্গরামানুজ মহাদেশিকন্

His Holiness śrīmad āṇḍavan śrīraṅgam

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

॥ শ্রী ৱৈনতেযাষ্টোত্তরশতনামস্তোত্রম্ ॥

শ্রী ৱৈনতেযঃ পুণ্যাত্মা পক্ষিরাজঃ শুভঙ্করঃ।
শর্মাধ্যক্ষঃ খগাধ্যক্ষো ব্রহ্মৱিদ্যাৱিশারদঃ ॥ **1** ॥

আহৃতামরপীযূষঃ সুবাহুঃ সামগাযনঃ।
গণ্ডশৈলনিভঃ শূরঃ পক্ষৱিক্ষেপঘাতৱান্ ॥ **2** ॥

ক্ষোণীধরসমাকারঃ ৱৈকুণ্ঠৱশৱর্তনঃ।
সদা ৱৈকুণ্ঠচিন্তশ্চ সর্পঘাতী মহাবলঃ ॥ **3** ॥

সুরাসুরগণেড্যশ্চ হর্ষকোলাহলান্ৱিতঃ।
বৃহৎপাদো মহাৱীরঃ পক্ষিমল্লঃ শুভান্ৱিতঃ ॥ **4** ॥

পতঙ্গকুলরত্নং চ নাগেন্দ্রাভরণঃ শুচিঃ।
সুধাকুম্ভধরস্সাধুঃ সুপর্ণো ৱিষ্ণুৱাহনঃ ॥ **5** ॥

অপমৃত্যুহরো দক্ষো বৃহৎপক্ষঃ সুবুদ্ধিমান্।
কার্কোটহারঃ সুযশাঃ পক্ষৱেগজিতানিলঃ ॥ **6** ॥

নীলাম্বরধরঃ স্রগ্বী সর্ৱেশো ভক্তৱৎসলঃ।
ৱাসুকি ব্রহ্মসূত্রশ্চ তক্ষেণ কটিসূত্রৱান্ ॥ **7** ॥

ৱেদ শাস্ত্রৱিচিন্ত্যশ্চ ব্রহ্মাণ্ডৱ্যাপকঃ পরঃ।
দৈত্যারির্ৱজ্রদংষ্ট্রশ্চ সুধাকুম্ভঃ সুহস্তকঃ ॥ **8** ॥

নাগহন্তা সাধুসেৱী ৱিশ্ৱৱিখ্যাতকীর্তিমান্।
কান্তি সম্পূর্ণদেহশ্চ শুক্লৱস্ত্রধরোঽমলঃ ॥ **9** ॥

ত্রিৱৃৎসামশিরস্কশ্চ সৎৱাদিগুণ সংযুতঃ।
স্বস্তি দক্ষিণপাদশ্চ সুৱর্ণসদৃশঃ পটুঃ॥ **10**॥

দীর্ঘবাহূরক্তনেত্রঃ ৱক্রতুণ্ডো মহাবলঃ।
অণ্ডজেন্দ্রঃ পাপনাশঃ নীলনাসঃ সুদীপ্তিমান্॥ **11**॥

মহাদর্ৱীকরাহারঃ সুচরিত্রঃ সুখঙ্করঃ।
ৱাহনেন্দ্রশ্চোত্তমাঙ্গঃ দ্বন্দ্বযুদ্ধ ৱিশারদঃ॥ **12**॥

সর্ৱধ্যেযোঽৱ্যাজবন্ধুঃ পদ্মদক্ষিণকর্ণকঃ।
শাকিনীডাকিনীহন্তা পিঙ্গলাক্ষো ভযঙ্করঃ॥ **13**॥

নিত্যতৃপ্তঃ সদাতুষ্টো দৈত্যারাতিরথো দৃঢঃ।
মহাধীরো মহাশূরো নিঃসহাযো মহাবলী॥ **14**॥

মহাপদ্মাখ্যনাগেন্দ্ররাজদ্বামশুভশ্ৱরাঃ।
ৱন্দিতব্রহ্মরুদ্রাদিৱিশ্ৱৱন্দ্যো মহামতিঃ॥ **15**॥

ফণীন্দ্র কটকস্বামী ৱিনতানন্দৱর্ধনঃ।
গরুত্মান্ গরুডশ্চণ্ডশ্চাষ্টনাগ ৱিভূষণঃ॥ **16**॥

তটিৎকান্তিসমানাভঃ মাতৃশোকৱিনাশনঃ।
কোটিসূর্যপ্রতীকাশঃ কনকাচলসন্নিভঃ॥ **17**॥

সর্ৱভূতগণেড্যশ্চ সর্পাভরণভূষিতঃ।
সকলক্ষ্ৱেলনাশী চ সর্ৱদোষনিৱারকঃ।
ৱিষ্ণু ভক্তানুকম্পী চ ঋগ্যজুঃসামৱিগ্রহঃ॥ **18**॥

ইতীদং ৱৈনতেযস্য নাম্নামষ্টোত্তরং শতম্।
ত্রিসন্ধ্যং যঃ পঠেন্নিত্যং স সর্ৱাভীষ্টমাপ্নুযাৎ॥ **19**॥

শ্রীমতা ৱৈনতেযেন পুনরাৱর্তিৱর্জিতম্।
নীযতে চ পরন্ধাম যোগিনামপি দুর্লভম্॥ **20**॥

॥ ইতি শ্রী ৱৈনতেযাষ্টোত্তরশতনামস্তোত্রং সমাপ্তম্॥